सम्बोधन, क्ली. (सं+बुध+ल्युट् ।) अन्यत्र
व्यासक्तस्य कार्य्यान्तरे नियोजनार्थमाभिमुख्य-
विधानम्। यथा हे विष्णो । इति व्याकरणम्॥
हे वृक्ष हे लते हे फल इत्यादावचेतने तूप-
चार: । इति दुर्गादास: ॥ तत्पर्य्याय: । आम-
न्त्रणम् २ । इति हेमचन्द्र: ॥ सम्बुद्धि: ३ । इति
मुग्धबोध: ॥ (यथा, साहित्यदर्पणे ।६।५१३।
"सम्बोधनोक्तिप्रत्युक्ती कुर्य्यादाकाशभाषितै:॥"
सम्भली, स्त्री, कुट्टनी । इत्यमर: । २ । ६ ।१९॥
"हे परपुरुषेण सह परनारीं योजयन्त्यां कुट्टनी
इति ख्यातायाम् । कुट्टयति छिनत्ति स्त्रीपुरुष-
वैमत्यं कुट्टनी नन्द्यादि: । शं कल्याणं भलते
निरूपयति शम्भली भल ङ निरूपणे पचा-
दित्वादन् नदादित्वादीप् शम्भली तालव्यादि:
सम्यक् भलते सम्भली दन्त्यादिरित्यन्ये ।"इति
भरत: ॥
सम्भव:, पुं, (सं+भू+अप् ।) हेतु: । उत्पत्ति: ।
(यथा, आर्य्यासप्तशत्याम् । ४५८ ।
"महता प्रियेण निर्म्मितमप्रियमपि सुभग !
सह्यतां याति ।
सुतसम्भवेन यौवनविनाशनं न खलु खेदाय ॥")
मेलक: । आधेयस्य आधारानतिरिक्तत्वम् ।
इति मेदिनी ॥ सङ्गत: । अपाय: । इत्यजय: ॥
वर्त्तमानकल्पीयार्हद्भेद: । इति हेमचन्द्र: ॥
सम्भव्य:, पुं. (सं+भू+यत् ।) कपित्थ: । इति
शब्दचन्द्रिका ॥ सम्भवनीये, त्रि ॥
सम्भार:, पुं, (सं+भृ+घञ् ।) सम्भृति: ।
समूह: । इति मेदिनी ॥ सर्व्वपूर्णत्वम् । इति
त्रिकाण्डशेष: ॥ (यज्ञादिकार्य्योपकरणद्रव्यम् ।
यथा, देवीभागवते । १ । १८ । २३ ।
"कृत्वा तस्य मखं पूर्णं करिष्यामि तवापि वै ।
तावत् कुरुष्व राजेन्द्र सम्भारन्तु शनै: शनै: ॥"
तथा तत्रैव । २ । ८ । ४ ।
"विवाहार्थञ्च सम्भारं रचयामासतुर्व्वने ॥"
संग्रह: । इति मल्लिनाथ: ॥ यथा, कुमारे ।
२ । ३६ ।
"पर्य्यायसेवामुत्सृज्य पुष्पसम्भारतत्परा: ।
उद्यानपालसामान्यमृतवस्तमुपासते ॥")
सम्भावनं, क्ली. (सम्भावयत्यनेनेति । सं+भू+
णिच्+ल्युट् ।) अलङ्कारविशेष: । यथा,—
"सम्भावनं यदीदं स्यादित्यूहोऽन्यस्य सिद्धये ।
यदि शेषो भवेद्वक्ता कथिता: स्युर्गुणास्तव ॥"
इति चन्द्रालोक: ॥
सम्भावनं क्रियासु योग्यताध्यवसाय: । इति
मुग्धबोधव्याकरणम् ॥ (सम्भावके, त्रि । यथा,
भागवते । ४ । १७ । २६ ।
"पुमान् योषिदुत क्लीब आत्मसम्भावनोऽधम: ।
भूतेषु निरनुक्रोशो नृपाणां तद्वधोऽवध: ॥")
सम्भावना, स्त्री, (सं+भू+णिच्+युच् । टाप् ।)
उत्कटकोटिकसंशय: । संपूर्व्वकात् भू क शुद्धि-
चिन्तयोरित्यस्मात् । ण्यासश्रन्थो युच् इत्यादिसूत्रेणान-
प्रत्ययनिष्पन्ना । यथा, "एवं कोट्यंशे औत्कट्य-
रूपं सम्भावनात्वमपि विषयताविशेष: । इति
ध्येयम् ।"इति सत्प्रतिपक्षचिन्तामणिदीधिति-
गादाधरी ॥ धूमदर्शनानन्तरं वह्न्यादिव्यवहा-
रस्तु सम्भावनामात्रादितिकुसुमाञ्जलिटीकायां
हरिदास: । पौराणिकास्तु सम्भवनामकं प्रमा-
णान्तरं मन्यन्ते तत्प्रमाणजन्या प्रमिति:
सम्भावना इति वदन्ति । तन्मतन्तु न चतुष्टय-
मैतिह्यार्थापत्तिसम्भवाभावप्रामाण्यात् इति
सूत्रेणोपन्यस्य शब्द ऐतिह्यानर्थान्तरभावादनु-
मानेऽर्थापत्ति-सम्भवाभावानामनर्थान्तरभावा-
च्चाप्रतिषेध इति सूत्रेण भगवदक्षपादपादै-
र्निराकृतम् । निश्चित्येति उत्कटकोटिकसम्भा-
वनोपलक्षणं इति तिथ्यादितत्त्वे स्मार्त्तभट्टा-
चार्य्यलिखनन्तु सम्भावनाशब्दस्य संशयमात्र-
परतया सङ्गमनीयम् । इति नानाग्रन्थेभ्य:
संगृहीतम् ॥
सम्भावित:, त्रि, (सं+भू+णिच्+क्त: ।)सम्भा-
वनाविशिष्ट: । सम्भवनयोग्य: । बहुमत: ।
यथा, भगवद्गीतायाम् । २ । ३४ ।
"अकीर्त्तिं चापि भूतानि कथयिष्यन्ति तेऽव्य-
याम् ।
सम्भावितस्य चाकीर्त्तिर्म्मरणादतिरिच्यते ॥"
"सम्भावितस्य बहुमतस्य ।" इति तट्टीकायां
श्रीधरस्वामी ॥
सम्भाषणं, क्ली,(सं+भाष+ल्युट् ।) कथनम् ।
आलापनम् । यथा,—
"कृते सम्भाषणादेव त्रेतायां स्पर्शनेन तु ।
द्वापरे त्वर्थमादाय कलौ पतति कर्म्मणा ॥"
इत्युदाहृतत्त्वम् ॥
सम्भाषा, स्त्री, (सं+भाष+अङ् । टाप् ।)
सम्भाषणम् ॥
सम्भिन्न:, त्रि, (सं+भिद्+क्त: ।) सम्यग्भेद-
विशिष्ट: । यथा,—
"सम्भिन्नकांस्यवद्घोषो निरेति वदनादयम् ।
कास इत्युच्यते लोके तालव्यान्तो न कीर्त्तित:॥"
इति प्राचीनकारिका ॥
सम्भु:, त्रि, (सं+भू+"विप्रसंभ्यो ड्वसंज्ञायाम्"
३ । २ । १८० । इति डु: ।) सम्भवति य: ।
इति मुग्धबोधव्याकरणम् ॥
सम्भृत:, त्रि, (सं+भृ+क्त: ।) उत्पन्न: । यथा,
मार्कण्डेयपुराणे । ८४ । ३४ ।
"इत्येतत् कथितं भूप सम्भूता सा यथा पुरा ।
देवी देवशरीरेभ्यो जगत्त्रयहितैषिणी ॥"
सम्भूतविजय:, पुं, (सम्भूतो विजयो यस्य ।)श्रुत-
केवलिभेदकबौद्धविशेष: । इति हेमचन्द्र: ॥
सम्भूयसमुत्थानं, क्ली,(सम्भूय मिलित्वा समुत्थानं
कर्म्मकरणं यत्र ।) मिलित्वैकमत्या बणिजां
कर्म्मकरणम् । तत्तु विवादपदविशेष: । यथा,
सम्भूयसमुत्थानं नाम विवादपदमिदानीमभि-
दधाति ।
"समवायेन बणिजां लाभार्थं कर्म्म कुर्व्वताम् ।
लाभालाभौ यथाद्रव्यं यथा वा संविदा कृतौ॥"
सर्व्वे वयमिदं कर्म्म मिलिता: कुर्म्म इत्येवंरूपा
सम्प्रतिपत्ति: समवायस्तेन ये बणिङ्नटनर्त्तक-
प्रभृतयो लाभलिप्सवो भूत्वा प्रातिस्विकं कर्म्म
कुर्व्वते तेषां लाभालाभावुपचयौ यथाद्रव्यं येन
यावद्धनं पण्यग्रहणाद्यर्थं दत्तं तदनुसारेणाव-
सेयौ । यद्वा । प्रधानगुणभावपर्य्यालोचनयास्य
भागद्वयमस्यैको भाग इत्येवंरूपया संविदा सम-
येन यथा संप्रतिपत्तौ तथा वेदितव्यौ । किञ्च ।
"प्रतिषिद्धमनादिष्टं प्रमादात् यच्च नाशितम् ।
स तद्दद्याद्विप्लवाच्च रक्षिताद्दशमांशभाक् ॥"
तेषां सम्भूय प्रचरतां मध्ये पण्यमिदमित्थं न
व्यवहर्त्तव्यमिति प्रतिषिद्धमाचरता यन्नाशितं
अनादिष्टमननुज्ञातं वा कुर्व्वाणेन तथा प्रमा-
दात् प्रज्ञाहीनतया वा येन यन्नाशितं स तत्
पण्यं बणिग्भ्यो दद्यात् । य: पुनस्तेषां मध्ये
चौरराजादिजनितात् व्यसनात् पण्यं पालयति
स तस्माद्रक्षितात् पण्यात् दशममंशं लभते ।
"अर्घप्रक्षेपणाद्विंशं भागं शुल्कं नृपो हरेत् ।
व्यासिद्धं राजयोग्यञ्च विक्रीतं राजगामि तत् ॥"
इह यत: पण्यस्येयन्मूल्यं इत्यर्घस्तस्य प्रक्षेपणात्
राजनिरूपणाद्धेतोरसौ मूल्याद्विंशतितमसंशं
शुल्कार्थं गृह्णीयात् । यत् पुनर्व्यासिद्धमन्यत्र न
विक्रेयमितिराज्ञा प्रतिषिद्धम् । यच्च राजयोग्यं
माणिक्याद्यप्रतिषिद्धमपि तद्राज्ञे अनिवेद्य लाभ-
लोभेन विक्रीतञ्च द्राजगामिमूल्यदानेनिरपेक्षं
तत् सर्व्वं पण्यं राजापहरेदित्यर्थ: ।
"मिथ्या वदन् परीमाणं शुल्कस्थानादपासरन् ।
दाप्यस्त्वष्टगुणं यच्च सव्याजक्रयविक्रयौ ॥"
य: पुनर्वणिक्शुल्कवञ्चनार्थं परीमाणं निह्नुते
शुल्कग्रहणस्थानाद्वापसरति यश्चास्येदमस्य
वेत्येवंविदादास्पदीभूतं पण्यं क्रीणाति विक्रीणीते
वा ते सर्व्वे पण्याष्टगुणं दण्डनीया: । अपि च ।
"तरिक: स्थलजं शुल्कं गृह्णन् दाप्य: पणान्दश ।
ब्राह्मणप्रातिवेश्यानामेतदेवानिमन्त्रणे ॥"
शुल्कं हि द्विविधं स्थलजं जलजञ्च । तत्र स्थल-
जमर्घप्रक्षेपणाद्विंशं भागं शुल्कं नृपो हरे-
दित्युक्तम् । जलजन्तु मानवेऽभिहितम् ।
"पणं यानं तरे दाप्यं पुरुषोऽर्द्धपणन्तरे ।
पादं पशुश्च योषिच्च पादार्द्धं रिक्तक: पुमान् ॥
भाण्डपूर्णानि यानानि तार्य्यं दाप्यानि सारत: ।
रिक्तभाण्डानि यत्किञ्चित् पुमांसश्चापरिच्छदा:॥"
शुल्कद्वयेऽप्ययमपरो विशेष: ।
"न भिन्नकार्षापणमस्ति शुल्कं
न शिल्पवृत्तौ न शिशौ न दूते ।
न भैक्ष्यलब्धे न हृतावशेषे
न श्रोत्रिये प्रव्रजिते न यज्ञे ॥" इति ।
तीर्य्यतेऽनेनेति तरो नावादिस्तज्जन्यशुल्केऽधि-
कृतस्तरिक: स यदा स्थलोद्भवं शुल्कं गृह्णाति
तदा दशपणान् दण्डनीय: । वेशो वेश्म प्रति-
वेश इतिस्ववेश्माभिमुखं स्ववेश्मपार्श्वस्थं चोच्यते
तत्र भवा: प्रतिवेश्या: । ब्राह्मणाश्च ते प्राति-
वेश्याश्च ब्राह्मणप्रातिवेश्यास्तेषां श्रुतवृत्तसम्प-